# ShrirAma Vijayatetarama Stotram or Shrirama Mantraraja Stotram

# શ્રીરામોવિજયતેતરામસ્તોત્રં અથવા શ્રીરામમન્ત્રરાજસ્તોત્રમ્

## Document Information

Text title : ShrirAma Vijayatetarama Stotram or Shrirama Mantraraja Stotram

File name : shrIrAmovijayetetarAmastotram.itx

Category : raama, shrIdharasvAmI, mantra

Location : doc_raama

Author : Shridharaswami

Transliterated by : Sonali Upendra Dasare

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: https://shridharamrut.com

Latest update : November 3, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીરામોવિજયતેતરામસ્તોત્રં અથવા શ્રીરામમન્ત્રરાજસ્તોત્રમ્

"શ્રીરામ જય રામ જય જય રામ" તારકમન્ત્રાત્મકમ્ ।

શ્રીરામઃ શ્રીકરઃ શ્રીદઃ શ્રીસેવ્યઃ શ્રીનિકેતનઃ ।
રાક્ષસાન્તકરો ધીરો ભક્તભાગ્યવિવર્ધનઃ ॥ ૧॥

મરેતિ વ્યસ્તંયન્નામ જપન્ વ્યાધોઽભવદૃષિઃ ।
જન્મદુઃખનુદં કાવ્યં દિવ્યં વ્યરચયન્મહત્ ॥ ૨॥

યદા યદા ભવેદ્ગ્લાનિર્ધર્મસ્ય સ તદા તદા ।
રાક્ષસાન્તકરો રામો સમ્ભવત્યાત્મમાયયા ॥ ૩॥

મહામોહકરી માયા યત્પ્રસાદાદ્વિનશ્યતિ ।
જઘન્યા અપિ પૂજ્યાશ્ચ પાવના બહવોઽભવન્ ॥ ૪॥

યસ્ય પ્રસાદતો જાતો હનૂમાન્ મહતો મહાન્ ।
જન્મમૃત્યુજરાદુઃખાન્મુક્તોઽદ્યાપિ વિરાજતે ॥ ૫॥

યસ્માત્પરતરન્નાસ્તિ યસ્ય નામ મહદ્યશઃ ।
રામં લોકાભિરામં તં વ્રજામઃ શરણં મુદા ॥ ૬॥

મૈતયિતિ નઃ સર્વાન્ સંસારાત્તારયિષ્યતિ ।
શ્રી રામ જયરામેતિ જયજયેતિ જપાદ્ધ્રુવમ્ ॥ ૭॥

રામ એવ પરમ્બ્રહ્મ રામ એવ પરાગતિઃ ।
મનઃ શાન્તિકરોરામો મન્મથારિ નમસ્કૃતઃ ॥ ૮॥

જયત્રયયુતઃ શ્રેષ્ઠો રામત્રયયુતો મનુઃ ।
યત્ર શ્રીરામમહિમા ત્રિસત્યમિતિ વર્ણ્યતે ॥ ૯॥

રામઃ શ્રીસીતયા યુક્તઃ સર્વૈશ્વર્યવ્ ઇત્યપિ ।
મહત્વમસ્યાનન્તં યત્ તચ્છ્રીરામપદે સ્થિતમ્ ॥ ૧૦॥

જય રામપદેનાયં જયરૂપ ઇતીર્યતે ।

યતોऽસૌ જયરૂપો હિ જયાર્હો જયદસ્તથા ॥ ૧૧॥

જયજયેતિ પદેऽર્થોऽયં દ્યોતતે સર્વસિદ્ધિદઃ ।
ય સ્મિન્ન માયા નાવિદ્યાં તસ્મિન્મોહઃકથં ભવેત્ ॥ ૧૨॥

રામત્રયે દાશરથિશ્ચેશો બ્રહ્મેતિ કથ્યતે ।
મરૂદાત્મજસન્ત્રાતા મોચયેન્મન્દનાદપિ ॥ ૧૩॥

શ્રી રામેતિ પદં પૂર્વં જયરામેતિ વૈ તતઃ ।
રામોऽત્ર દ્વિર્જયાત્પશ્ચાદ્વર્તતે મનુરાજકે ॥ ૧૪॥

મહાસંસારવ્યામોહાન્મોચયત્યાશ્વયં મનુઃ ।
જપનીયઃ કીર્તનીયો મુદા સર્વૈશ્ચ સર્વદા ॥ ૧૫॥

યક્ષારાક્ષસભૂતાદ્યા પીડાऽનેન વિનશ્યતિ ।
રામો ધનુર્ધરો નિત્યં સંરક્ષતિ પદે પદે ॥ ૧૬॥

મદોન્મત્તનરૈશ્ચાપિ ન દુઃખ લભતે કદા ।
જન્મસન્તાપચન્દ્રોऽયં જ્ઞાનવિજ્ઞાનદો મનુઃ ॥ ૧૭॥

યત્રકુત્રાપિજપ્યોऽયં શુચિર્વાપ્યશુચિસ્તથા ।
જપતઃશાન્તિમાપ્નોતિ પ્રશસ્તોऽસ્મિન્કલૌમતઃ ॥ ૧૮॥

યજ્ઞાનાં જપયજ્ઞોऽસ્મિ ભગવદ્વાક્યમીદૃશમ્ ।
રામેણૈવ પુરાદિષ્ટઃ ષડઙ્ગાદિવિવર્જિતઃ ॥ ૧૯॥

મરૂત્સુતાવતારાય રામદાસાય ધીમતે ।
શ્રીરામવરયુક્તોऽયં સુલભોऽપિ ફલાધિકઃ ॥ ૨૦॥

ત્રૈલોક્યપાવની પુણ્યા મુક્તિદારાઘવસ્તુતિઃ ।
ભદ્રં તનોતુ લોકેષુ ગઙ્ગેવ કિલ સર્વદા ॥

ઇતિ શ્રીમત્ પરમહંસ પરિવ્રાજકાચાર્ય સદગુરૂ ભગવાન શ્રી શ્રીધરસ્વામીમહારાજવિરચીતં શ્રીરામોવિજયતેતરામસ્તોત્રં અથવા શ્રીરામમન્ત્રરાજસ્તોત્રં સમ્પૂર્ણમ્ ॥

રચનાસ્થલ અયોધ્યા

Encoded and proofread by sonAlI upendra dasare

*ShrirAma Vijayatetarama Stotram or Shrirama Mantraraja Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*